नं० ४९१९

नाम- यंत्रचिन्तामणि०

कर्ता- दामोदरः गङ्गाधर पुत्र०

पत्र संख्या- २२ पत्राणि सं० ४

विषय०- तन्त्रम्

© Dharmartha Trust J&K. Digitized by eGangotri

यंत्रचिंतामणिः

४५१९

4519

5412—17

© Dharmartha Trust J&K. Digitized by eGangotri

यंत्रचिंतामणि नं ८५१२

© Dharmartha Trust J&K. Digitized by eGangotri

यं॰ चि॰ म॰

ॐ श्रीगणेशाय नमः ॐ नमः शिवाय ॐ नमः स्वरस्वत्यै ॐ नमो गुरवे यां योगमायां ममराधिविद्यां विशेषरूपां भृगुवंशजाताम् त
स्यात्मजो भूद्भुवि धर्मशीलो नाम्ना महादेव इति प्रसिद्धः १ नैसर्गवैरं प्रजहुश्च सत्वा यां प्राप्य दुष्टा हितरक्तकाद्याः तस्मादासीत्सुमतिवि
कसद्देवदत्तः कलावान्मान्यो राज्ञी सदसि विदुषामाद्यः श्रीगाङ्गवाहः उल्लोलोलीदिग्धिदिपिजनाः कीर्तिपीयूषसिंधुर्यस्यालीरेश्च वर्णपुट
कैः स्फूजिताङ्गाः पिबन्ति २ गंगाधरस्तत्तनयो वशी च विवेकगांभीर्यगुणैरुदारः यं प्राप्य लक्ष्मीश्च सरस्वती च नित्यादयुग्मं स्थिरतां तनूते
दामोदरः सर्वकलाप्रवीणो बभूव तस्माज्जगन्नाथमनोज्ञः लब्धप्रतिष्ठो गुरुदेवभक्तो मान्यः सतां धर्मपरायणो यम् ४ दृष्ट्वानेकाशिवा
गमांश्च बहुधा चालोक्य सोरागमानन्देवीशास्त्रमहागमांश्च विविधानालोक्य विस्तारतः कर्तुं वाञ्छति संग्रहं हृदमतिमान्द्यामोदरः सत्स्व
यम् ५ लोकानां च हिताय यन्त्रनिकरं मंत्रेण युक्तं स्फुटम् ६ धीरितश्च इन्दुरुद्रेन स्वजनेन द्विजपुंगवः चकार कल्पं यन्त्राणां चिंतामणिरिति स्फुटम् ७ पुराकै
लासशिखरे नानाधातुविचित्रिते नानाद्रुमलताकीर्णे नानापुष्पोपशोभिते ८ अप्सरोगणसंकीर्णे सिद्धचारणसेविते शिवभक्तैः सुरैर्दैत्यैः पन्नगैश्च वि
राजिते ९ योगध्यानैकनिपुणैस्तापसैर्विविधैः सुसेविते श्रीयुधेश्च तनावह्निहृदीरितजयस्वनैः १० त्रिनेत्रैश्च द्विनेत्रैश्च एकनेत्रैरनेत्रकैः त्रिपादैश्चैकपादैर
कपादैः सहस्रशः ११ महाक्रूरैर्महाभीमैः करालैश्च विराजिते रुद्रैस्त्रैलोक्यपायैश्च बाणैर्भैरवैस्तथा १२ दुर्वासाद्यैश्च मुनिभिः समन्तात्परिसेविते एवंभूते च कै
लासे देवदेवः स्वयं शिवः १३ ज्योतिर्मयो महातमयो ह्यचिंत्यश्च सदाशिवः अव्यक्तो व्यक्तरूपो यत्रास्ते तु सदाशिवः १४ कदाचिदुपविष्टोयमेकान्ते परमेश्वरः सृ
ष्टिस्थितिप्रसन्नात्मा सृष्टिसंहारकारकः १५ चिंतामणौ कल्पवृक्षे पत्रैश्चैवेन्दुरूपसमुज्ज्वलैः निर्मिते तस्मिन्नसमो यदि तपीठिके यक्षनाथदामोदरवंदितेन १६
इति श्रीयंत्रचिंतामणौ नाम्नि महाकल्पे ग्रन्थसिद्धिप्रदे उमामहेश्वरसंवादे दामोदरपंडितोद्धृते प्रथमपीठिका समाप्ता सपादुदेव्याः कबरी विलासोल्लास्य ल
सन्त्यागिरिराजपुत्र्याः यं पश्यतो भालमृगांकमौलेः लक्षणेन सर्वज्ञपदं बभूव १ एकदा देवदेवेशं ह्यादेवी सुविस्मिता उपगम्यासने वीक्ष्य प्रोवाच जगदंबिका २ देव्यु
वाच देवदेव जगन्नाथ करुणाकर शंकर वर्णाश्रमाश्च धर्माश्च संदेहाश्च मम प्रभो ३ कौतुकानि सकल्पानि पुराणादीनि च प्रभो मंत्राणां विनियोग
श्च यंत्राणां निर्णयस्तथा ४ आचारा विरते लोके योगाभ्यासः सुदुर्लभः दुर्लभं परमं ज्ञानं यंत्रकौतुः सुदुर्लभः ५ अनेकमंत्रयोगा वै वेदोक्तापि हि दृ
प्यते तथैवागमभेदेषु उदिता हि न संशयः ६ एवं द्विजाश्च मंत्राश्च जप्यन्ते क्लेशभागिनः पाखण्डिभिः परांभूता नास्तिकैर्वेदनिंदकैः ७ विना मंत्रैर्जे
ये हि मे स्वल्पक्लेशेर्यया प्रभो तत्क्षणं जायते सिद्धिः सुसिद्धा सर्वकामदा ८ विवादे व्यवहारे च रणे वै विजयेत्तथा एतत्सर्वं यथा देव सिध्यते साधकस्य हि ९
विद्या ये देवदेवेश रहस्यं परमेश्वर श्रीमहादेव उवाच वदाचारो मया प्रोक्तः ऋषीणां तु महात्मनां शिवधर्मस्तु मुक्तानां वैष्णवानां च वैष्णवः १० सौरं शाक्तं
मया प्रोक्तं बहुनामविधिक्रमम् शातातपो बहुधा प्रोक्तं भैरवं बहुधा प्रिये ११ धर्मकामार्थमोक्षाणां ज्ञानं चैव प्रकाशितं रहस्यं गोपितं भद्रे सर्वं चापि न संशयः १२
रहस्यहीनो मंत्रस्तु ध्यानेनापि विशेषतः न सिध्यति वरारोहे कल्पकोटिशतैरपि १३ श्रीदेव्युवाच प्रसादं कुरु देवेश शंभो पायं वदस्व मे रहस्यं सर्वसत्वोपद्रवक्ष
यकारकं १४ विना होमेन जाप्येन पुरश्चरणसेवया कलौ तु सिध्यते देव तथोपायं वदस्व नः १५ श्रीशिव उवाच साधु साधु महाप्राज्ञे लोकानां हितकारिके १
दंसर्वं न केनापि पृष्टोहं पद्मलोचने १६ श्रुणुष्वैकाग्रचित्तेन रहस्यं लक्षणसिद्धिदं कल्पचिंतामणिर्नाम गुह्याद्गुह्यतरं महत् १७ सर्वागमस्य सारं हि मंत्रा
णां सारमुत्तमं श्रुणु सर्वसारात्सारतरं महत् १८ अस्मिन्कल्पे भविष्यंति चिंतामणिमये शुभे यंत्राणि बहुधा देवि काम्यकर्मकराणि च १९ एतत्क
ल्पे सदा यस्य लिखितं विद्यते गृहे संपूज्यते प्रतिदिनं प्रभावं तस्य मे शृणु २० अपमृत्युभयं नास्ति नास्ति चौरभयं तथा भूतप्रेतपिशाचानां प्रभावो नैव जायते २१


विमुनाम्युयमानसु
रूपइष्टः सदाशिवः २


वेदस्य॰

© Dharmartha Trust J&K. Digitized by eGangotri

अन्यस्य कथितं त्वेतन्न सिध्यति कदाचन अविश्वासी न कर्तव्यः साधकेन वरानने २२ अभिचारं भवेत्कल्पमविश्वासान्न संशयः संशयेन कृतं यंत्रं विपरीतं प्रजायते २३ ॐ नमो
स्वानं कृत्वा शुचिर्भूत्वा पूजयेत्कुलदेवतां लेखनीयं प्रयत्नेन चैकांते यंत्रमुत्तमम् २४ यस्य कस्य प्रयोगस्य विधिरेषः प्रकीर्तितः दिनत्रयं प्रकुर्वीत पूजां भोगं विधानतः २५ त्रिरात्रं भूमि
शायी स्याद्ब्रह्मचर्यरतः शुचिः त्रिदिनाज्जायते सत्यं साधकस्य सुनिश्चितं २६ सिद्धसाध्यं च मंत्रं वै सुसिद्धमथवा ध्रुवं अवश्यं वदति स्वप्ने मंत्राधिष्ठानदेवता २७ यदा न जायते स्व
प्नं तदा साध्यं विनिर्दिशेत् कृत्वा देवमुखे तत्त्वं मेकलं सिद्धिविधानतः २८ नो चेद्यथाकृतं स्वप्नं तथैव विनिर्दिशेत् यथा॥ आदौ निवारितः स्वप्नं तथान्यथं यंत्रमुत्तमं २९ एवं वि
लिखेद्यः कुर्यात्सिद्धिरेव प्रकीर्तिता अथवा यस्य मयोक्तानि यंत्राणि सुबहूनि च ३० येन यंत्रेण मंत्रेण सिद्धिर्येषां प्रजायते तेन तेन हितं ज्ञात्वा निषिद्धं तु परित्यजेत् ३१ विधिरेव प्रशस्
तोऽत्र यंत्राणां भूतलेऽकलौ मंत्रकोष्ठेन तु पश्यंति सिद्धसाध्यादि साधकाः ३२ न तेषां जायते सिद्धिः कलिकाले कदाचन न चैव साधको लोके नैव प्रकृतिकोऽजनः ३३ न चैकं राशिना
तत्रेन चैका कुलदेवता यंत्रं बीजं तथा मंत्रं चतुर्थं भवति प्रिये सिद्धः साध्यस्तथा रिक्तश्च सिद्धस्तथा परः सिद्धः सिध्यति कालेन साध्यः सिद्ध्यति वा न वा रिक्तश्च निष्फलं तेषु
लेषु सिद्धस्तत्क्षणेऽर्थदः तस्मादेव दशारा षष्टिकाल स्वमग्रहोदयं साधकस्य मनोभावं सर्वं ज्ञात्वा समाचरेत् ३६॥ एतद्रहस्यं परमं तवेरितं मंत्रस्य यंत्रस्य च सिद्धिदायकम् एत
द्धि ज्ञात्वाखिलसिद्धिभाजनं भवंति सर्वे भुवि साधकाः सदा ३७ इति श्रीयंत्रचिंतामणौ द्वितीयपादः समाप्तः २॥ महामोहने॥ एको देवः स जयति शिवः सर्वदुःखान्तकारी शा
र्दूलं नयनकमलेनार्चितो विश्ववेद्यः यः स्वं गौरीगिरिशमनयाद्देहार्धभागे लोकानां यो भयविधिहन्ता कालकूटं दधार १ राज्ञा वश्यकराणि दुष्टदुष्टप्रज्वलि लोकजना
नां तथा तान्युद्धं महागणांश्च बहुधा यंत्राणि बीजानि च अस्मिन्कल्पवरे क्रमेण विविधान्गायत्र्या मंत्रो नित्यं सत्यमतिः प्रवक्ष्यति तदा दामोदरः सादरं २ श्रीशि
व उवाच राजवश्यं महायंत्रं शृणु देवि सुशोभनं कांस्यभाजनमानीय कुंकुमादिभिः कृतं ३ जातीकाष्ठेन विलिखेद्रोचनाचंदनेन च साध्यनाम
लिखेन्मध्ये वर्तुलं वेष्टयेत्ततः ४ तस्योपरि प्रकुर्वीत पद्मं षोडशकर्णिकं अकारादि स्वरान् लेख्यं दले प्रत्येकके क्रमात् ५ ततश्चैव वेष्टयेत्सम्यक् रेखा
भिस्त्रिभिरुत्तमः मल्लिकाजातिकुसुमैः सितैर्मोजैः प्रपूजयेत् ६ अन्यैश्च श्वेतकुसुमैः सुगंधैः श्वेतकैरपि संपूज्यं यंत्रराजेन महामोहनसंज्ञकं
७ एवं सप्तदिनं कृत्वा त्रिलोहे वेष्टयेत्ततः यो धारयेद्धि शिरसि बाहुमूलेऽथवा पुनः ८ यो षिद्वा पुरुषो वापि कृतनिश्चयसंयुतः किंकरा इव ते स
र्वे वशीभूताः सदेव हि ९ इति श्रीयंत्रचिंतामणौ वशीकरणाधिकारे तृतीयपीठिकायां महामोहनं नाम प्रथमं यंत्रं १ श्रीशिव उवाच॥
अथातः संप्रवक्ष्यामि यंत्रं वै बीजसंपुटं राजवश्यकरं श्रेष्ठं जनवश्यकरं परं १ एकयंत्रे समालिख्य ह्रींकारं च चतुष्टयं ह्रींकारपुटितं प
श्चात्साध्यनाम लिखेद्बुधः २ रोचनाकुंकुमेनैव श्रीखंडेन तथैव च अनामिकाग्रकमिश्रं लिखेद्यंत्रं सुशोभनं ३ एतद्यंत्रं तदा कुर्याद्यदा कु
ङ्कुमेन तापयेत् वीक्षते त्रिकांडे वै दुः सर्वस्वं चापि नापि तु ४ तदेतद्यंत्रराजं तु संपूज्य विधिवत्स्वयं नानागुह्यैः सनैवेद्यैर्मांसेश्च विविधैः शुभैः
५ यथाशक्त्या तु संपूज्याः कुमार्यो ब्राह्मणास्तथा योगिन्यश्च सुवासिन्यो नमस्कृत्य सुनिश्चितम् ६ तद्यंत्रं गुटिकां बध्वा कंठे हि राजमं
दिरं तत्कोपशमयत्याशु वशीकरणमुत्तमम् ७ प्रसादं लभते राज्ञो विज्ञायते नात्र संशयः यंत्र चिं· तृ· पी· वृ· पी· धि· राजेको यथाम· यंत्रं २
श्रीशिव उवाच॥ अतः परं प्रवक्ष्यामि वश्ययंत्रं मनोहरं १ इष्टे नैव स्वामिने कर्तुं यावज्जीवं हि मानवः निर्यंत्रेरखाछयं कुर्याद्द्वींदेचद
लेणेत्तरे २ अंते तु कर्णिकां कुर्याद्द्वितीये चोत्तरे पुनः प्रणवं च तथा श्रीं साध्यनाम तथैव च ३ तदंते श्रीं च प्रणवं लिखेन्मंत्र
च साधकः उपर्युपरि दलान्स्त्रीं अन्तयोर्भागे त्रयं तथा ४ इति लोत्तरं सर्वेषु दलेषु विलिखेत्क्रमात् तकारान्तं विसर्गी तु







© Dharmartha Trust J&K. Digitized by eGangotri

१

यं. वि.
म. २







कोणे श्रीकारबीजकं ५ एवं लिखित्वा तद्यंत्रं रोचनाभूर्जपत्रके । तमेव संपुटे लिख्यात्पुटयेदग्निना ततः ६ ऊर्द्ध्वं न्यस्त्वा गृहीत
तु यंत्रं भस्म पिबेन्नरः यावज्जीवं भवेत्तस्य सवश्यो नात्र संशयः ७ तृतीयं च समाख्यातं स्वामिवश्यकरं परं इति तृतीयपीठिका
यां स्वामिवश्यकरं तृतीयम् श्रीशिव उवाच यस्य कस्यापि केनापि कार्येण निर्नोषितं भवेत् तदा महाभियोगेन दिव्यकोपप्रका
रयेत् १ तन्मोहनार्थाय तदा कुर्यादिव्यं विचक्षणः रोचनाकुंकुमेनैव षट्कोणं भूर्जपत्रके २ प्रतिकोणे च ह्रींकारं मध्यदेशे लिख
न्नरः कोणान्तराले ह्रींकारान्विलिखित्वा षडेव हि ३ साध्यनाम लिखेन्मध्ये ह्रींकारैः सर्वतः पुटं उपदेशः पूर्वमंते ह्रींकारान्
रो लिखेत् ४ तमेव संपुटे लिख्याद्भूजयेद्भक्तिभावतः द्वितीये ह्नि तदा कश्य यंत्रराजं सुपूजितं ५ दिव्यकाले शिखायां तु बद्ध्वा यंत्रं
यत्नतः मोनस्य स्तत्र गच्छेत्तु दिव्यं वेगेन मानवः ६ न तदा दुःखमं किंचिद्यंत्रराजप्रसादतः दिव्यस्तं भो भवेच्चूनं सलोके ध्ययनामियात्
इति श्रीवशीकरणाधिकारे चतुर्थं यंत्रम् श्रीशिव उवाच यदा कस्यापि क्रुद्धो राजापि कृतिमारिणुः तदा तन्मोहनार्थाय मु दुःखमिमह
णायच १ रोचनाकुंकुमेनैव लिखेद्यंत्रं च भूर्जके ह्रीं सः साध्यस्य नामांते पुनः ह्रीं सः सयेव च २ पश्चात्तु द्विपुटं यत्सम्यक् चतुःको
णां गरे लिख्या दुपर्यष्टदलं त्रीणि कोणे चैक लिखेद्बुधः ३ ह्रींकारं सःकारं च सःकारं ह्रींकारमेव च एवं दले पुनः पूज्य प्रतिबीज
चतुष्टयं ४ तमेव संपुटे लिख्यात्पूजयेच्च विधानतः दृष्ट्वा नाचमुखं सत्स्तं भीत्वा कृपो भवति तत्क्षणात् ५ राजकोपहरं नाम इष्टमो
हनकं परं एवं सप्तदिनं कार्यं यावत्कार्यं प्रसिध्यति ६ इति श्रीवशीकरणाधिकारे राजमोहनं नाम पंचमं यंत्रं श्रीशिव उवाच
यदा कुलः प्रभुर्भृत्यं जातकन्तं हिंवा कृति तदा स्वजीवरक्षार्थं यंत्रं मृत्युंजयं लिखेत् १ आनीय भूर्जपत्राणि लिखेद्यंत्रं द्वयोरिति मध्ये नाम
लिखित्वा तु चतुःकोणं तु रेखया २ एवं सप्तचतुःकोणानि लिखेल्लोहशलाकया तस्योपरि दलं त्रीणि विलिखेच्च चतुर्दिशम् ३
दशानां येलिखिल लालिलीलुलूयदलिणे ले लै लो प्रत्यग्दले लौ लं लः स्यदयोत्तरे ४ एवं तद्दशदले न्यस्य प्रत्येकं बीजमेककं
त्रिशूलं च चतुःकोणे सबिंदुं विलिखेन्नरः ५ एवं यंत्रद्वयं ख्यातं संपुटं कारयेत्ततः निधाय भूमौ तद्यंत्रं साधकः प्राङ्मुखः ६ तस्यो
परि तिष्ठेत्तूनं समानी यस्मात्पीडां वश्यान्नरः स्मृत्वेगं च कोपस्तस्य प्रशाम्यति ७ मृत्युंजयं महायंत्रं प्राणरक्षाकरं परं यदाते
स्यावरि क्रोडः कालोपि हि दुरासदः ८ तत्रापि यंत्रराजोयं रक्षत्येव न संशयः इति श्रीवशीकरणाधिकारे तृतीयपीठिकायां षष्ठं
वशीकरणं नाम मृत्युंजयं षष्ठं यंत्रम् श्रीशिव उवाच विवादविजयार्थे च यंत्रं कुर्यान्मनोहरं मध्ये नाम लिखित्वा तु चतुष्कोणं ततः १
चतुर्दले ततः कुर्याद्धीजयुक्तं तु मानवः ह्रींयं ह्रींयं प्रतिदले रोचनाकुंकुमेन च २ भूर्जपत्रे समालिख्य दुग्धमध्ये क्षिपेत्ततः ततो
गच्छेद्दिवादार्थं जयेन्नात्र संशयः ३ विवादविजयं नाम यंत्रं देवैः सुपूजितं न देयं यस्य कस्यापि यदीच्छेत्सिद्धिमात्मनः ४
इति श्रीवशीकरणाधिकारे विवादविजयं नाम सप्तमं यंत्रम् श्रीशिव उवाच यदापि देवदत्ताणां
द्रव्यनष्टिः प्रजायते धनिको याचते द्रव्यं निर्धनं चापमर्णिकम् १ तस्य दानं तु नैव स्तीति द्रव्यभागमम्यं


षामः
२



लि॰

© Dharmartha Trust J&K. Digitized by eGangotri


१




२




३



४



५



चन् तदा तन्मोहनार्थाय यंत्रं मायामयं महत् २ रोचनाकुंकुमेनैव भूर्जपत्रे सुविस्तृते षट्कोणं चक्रम
मध्ये तु साध्यनाम प्रतिष्ठितं ३ कोणान्तरे बहिर्लेख्याः ह्रीँकाराः स्वयमेव काः ह्रीँकारमेकं विलिखेत् कोणप
त्रिसुसंस्थितम् ४ ततस्तद्वेष्टयेत्सम्यग्वर्तुलं यंत्रमुत्तमम् पंचविंशति ह्रीँकारैः स्वकं वृत्ते विवेष्टयेत् ५ पुन
स्तद्वेष्टयेत्सम्यग्वर्तुलं पूर्ववत्प्रिये ६ तन्मासं प्रतिदिनं यंत्रं पूजयेद्विधिवत्ततः ७ अयं हि पूजयेद्देवि महायोगी विचक्षणः
मार्कंडेयपुराणोक्तं देवीमाहात्म्यमुत्तमम् ७ जपेत्सप्तदिनं यावत्तावद्धोमं तु कारयेत् अंते च ब्राह्मणान्हितान्द
त्वा भोजयेत्कन्यकात्रयम् ८ प्रतिश्लोकं च जुहुयात्पायसं मधुसर्पिषा वेष्टयित्वा त्रिलोहेन बहुमूल्येन गलेऽथवा ९
तेनैव धृतमात्रेण पतिको वश्यतामियात् नयाचितं स्तु कुब्येवा गिज्यार्थं ददाति च १० इति वशीकरणाधिकारे
पतिवश्यकरणं कमष्टमं यंत्रं श्रीशिव उवाच यदा यानात्राजकुष्टा भवंति पार्श्ववादिनः येः शून्यं कार्ये जा
तं च कुर्वते हर्निशं सदा १ तदा कुर्यान्महायंत्रं दुष्टमोहनसंज्ञकम् मध्ये नाम लिखित्वा तु वर्तुलं वेष्टयेत्ततः २
ततश्चाष्टदलं कृत्वा बीजानि विलिखेत्ततः सकाराः सविसर्गान्ताः कोणेषु सर्वतोन्यसेत् ३ एवं मुत्वा दिग्ले
खेच्चतुर्दिक्षु क्रमेण तु ततस्तद्वेष्टयेत्सर्वं चतुःकोणं लिखेत्तथा ४ खेचरत्नेन संलेख्य भूर्जपत्रे मनोहरम् ५
तद्यंत्रं तु संपूज्य प्रक्षिपेत् कुंभमध्यतः ६ दुष्टाः सर्वे विनश्यंति राज्यमानं ददात्यपि एकविंशद्दिनं याव
त्तावत्तद्वै वयं चक्रम् ७ इति श्रीवशीकरणाधिकारे दुष्टमोहनंनाम नवमं यंत्रम् श्रीमहादेव उवाच
अथातः संप्रवक्ष्यामि विवादजयवर्द्धनम् व्यवहारमयेमं गोह्यीदं यंत्रं प्रशस्यते १ पूर्वं पंक्तौ समालेख्य ह्रीँ
कारं स्मात्तथैव च तस्याधः साध्यनामाय चतुःकोणेन वाष्टितं २ कोणे दलेकाष्ठी नृमध्यदेशे तथैव च ३ उत्तरेलो
मबीजानि ईशाने लं तथैव च ४ एवं चाष्टदलेन्यस्य बीजानि द्वादशैव हि तन्मध्ये संपुटे स्थाप्य यंत्रराजे जया
वहे ५ अभ्यर्च्य गंधपुष्पाद्यैर्दीपैश्चाष्टभिरेव च लोकपालाः सुसंपूज्या भोजयित्वा कुमारिकाः ६ बलिदी
पैः प्रपूज्याथ चाष्टदिक्षु क्रमेण तु तावत्पूज्यं प्रयत्नेन यावत्कार्यं प्रसिध्यति ७ व्यवहारजयं नाम विवादवि
जयं तथा राज्ये कुलविवादे च जयं नास्त्यत्र संशयः ८ मानोन्नतिर्भवेत्तस्य यंत्रराजप्रसादतः इति श्रीवशीकर
णाधिकारे विवादविजयं नाम दशमं यंत्रं श्रीशिव उवाच यदीच्छेत्स्ववशं कर्तुं यावज्जीवं वरानने तदा यंत्रं
प्रकुर्वीत गाणपत्यं हि सिद्धिदम् १ भूर्जपत्रं समानीय विस्तृतं छिद्रवर्जितम् स्वनामारक्तो समिश्रद्विरदस्य
मदं तथा २ यावकं चरसं चैव रोचना च तथैव च एवं चतुष्कं संयोज्य जातीकाष्ठेन वे लिखेत् ३ ह्रीँकाराः सततं से
लेख्याः पूर्वपंक्तौ वरानने अधःपंक्तौ तु संलेख्य क्रौं ह्रीँ क्लीँ गं तथैव च ४ एवं पंक्तौ च तुर्थ्यां तु ह्रीँका
कोणेः


दलिणे रोमबीजानि
नैर्ऋते लं तथैव च
पश्चिमे लंभबीजानि
वायव्ये लं तथैव च २

लाख


© Dharmartha Trust J&K. Digitized by eGangotri

यं· चि· म
१

शाणां चतुष्टयम् एवं संलिख्य बीजानि द्वाविंशतिसमानके ५ एकस्मात् देष्टयेत्स स्यक्चतुःकोणं तु रेखया । गंकारादशसंलेख्यो पूर्वपश्चिमउत्तरे ६
कृत्वा मूर्तिं गणपतेर्यंत्रं तस्योदरे लिपेत् संपूज्य गंधपुष्पाद्यैरिमं मंत्रमुदीरयेत् ७ देवदेव गणाध्यक्ष हेरंब नमस्कृत देवदत्तं च मे वश्यं या
वज्जीवं कुरु प्रभो ८ इमं मंत्रं समुच्चार्य हस्तमात्रं निखन्य च दिक्पात तत्र गणाध्यक्षं तं पूरयित्वा तु मं निकामम् ९ यावज्जीवं भवेद्वश्यो गणनाथप्रसादतः
इति श्रीवशीकरणाधिकारे गाणपत्यनामैकादशं यंत्रमेकादशम् श्रीमहादेव उवाच अथातः संप्रवक्ष्यामि येन वश्यकरं शुभम् मध्ये नाम लिखि
त्वा तु ईंकारं विलिखेद्बुधः १ त्रिरावृत्तं तु संवेष्ट्य भूर्जपत्रे सुविस्तृते चतुर्दले लिखेन्मंत्रान् बीजेदिक्चतुष्टये २ ॐ नमो ॐ नमो लेख्य पश्चिमपूर्वके
दले ॐ अजिते ॐ अपराजिते दक्षिणोत्तरे लिखेत् ३ जनवश्यकरं नाम यंत्रराजं मनोहरं त्रिदिनं पूजयेन्नित्यं ब्रह्मचर्यरतो नरः ४ ब्राह्मणान्भोजयेच्चैकं
चतुर्थेऽहनि सुव्रतः त्रिलोहवेष्टितं कृत्वा बाहुमध्ये च धारयेत् ५ हे मंत्र जनं वापि पदृस्त्रे विशेषतः यंत्रं तु धारयेच्छ्रेष्ठं बाहुमूले गले यवा ६ सर्वेषां
चैव यंत्राणां विधिरेष प्रकीर्तितः सुभगो दर्शनीयश्च स्वजनानां च वल्लभः ७ यंत्रस्य धारणादेव भवेन्नास्त्यत्र संशयः कर्पूरकुंकुमैर्लेख्यं तथा गोरोचनेन च ८
इति श्रीवशीकरणाधिकारे जनवश्यकरं नाम द्वादशं यंत्रं श्रीशिव उवाच जगद्वश्यं महायंत्रं श्रृणु देवि सुशोभनं कर्पूरमृगनाभिश्च चंदनं रोचना तथा १
जातीकाष्ठेन संलेख्यं भूर्जपत्रे विशेषतः प्रणवं च वकारं च जं ह्रीं ड्रं च तथैव च २ पूर्वपंक्तौ समालेख्य प्रणवादि बीजपंचकं दें ड्रं ह्रीं च प्रणवं च रकारं च तथैव च ३



द्वितीयपंक्तौ संलेख्य वकारं तदनंतरं डंकारं च जगन्नाम वकारं तदनंतरम् ४ तदग्रे च लिखेन्नूनं ठकारं च चतुर्थकम् दीकारं च
ततश्चांते एवं वै बीजपंचकं ५ एवं बीजानि संलेख्य चतुष्कोणं तु स्थापयेत् त्रिरेखया महत्कार्यं जगद्वश्यकरं परं ६ त्रिलोह
वेष्टितं कृत्वा धारयेद्बाहुमध्यतः जगद्वश्यं भवेत्तस्य यंत्रं यस्तु तिष्ठति ७ संपूज्य नित्यमेवादौ यंत्रं देवार्चनादिषु ८ इति
श्रीवशीकरणाधिकारे जगद्वश्यं नाम त्रयोदशं यंत्रम् शिव उवाच यतो ह्यभृत्यः कुत्र सन्मार्गं सर्वं प्रकाशते तु दाता
न्मोहनार्थाय सत्वस्यार्थं च सिद्धये १ न शक्यते निराकर्तुं देशकालबलेन च पिशाचिकाख्यं यंत्रं तु कर्तव्यं च विचक्षणैः २ मध्ये नाम
लिखित्वा तु वर्तुलं वेष्टयेत्ततः चतुर्दलं प्रयत्नेन बीजयुक्तं मनोहरम् ३ ह्रींकाराश्च लिखेल्लोल्या दलमध्ये चतुर्दिशम् रोचना
भूर्जपत्रे च लेखिन्या विलिखेन्नरः ४ ततस्तद्दलमध्ये तु क्षिपेद्रुद्रेणभाषितम् ५ इति श्रीवशीकरणाधिकारे भृत्यवश्यकरं नाम पिशाचिका
ख्यं नाम चतुर्दशं यंत्रम् श्रीशिव उवाच क्रूरप्रकृतिकः स्वामी यदा सेव्यते जनैः सेव्यमानो यदि भृशं न ददाति कदाचन १ खलैः परिवृतो नि
त्यं दुराचारो महीपतिः उत्तमो वाधमो वापि म्लेच्छो वा पशुतां गतः २ यंत्रं कालानलं कुर्यात्तद्वश्ये सिद्धिकारकम् साध्यनामाल



मालेख्य गर्भे ह्रींकारगामिनः ३ यावत्पश्चादरानाम्नि तावत्पत्र ह्रीं तथा ईंकारश्चांते संलेख्य रोचना भूर्जपत्रके ४ त्रिराव
तं चतुष्कोणं दीर्घं णफलवत्कृतं राजिकाप्रतिमां कुर्यात्तत्पादस्य च पांसुना ५ प्रक्षिपेत्तस्य तन्मध्ये यंत्रं कालानलं महत्
संपूज्य प्रतिमां तां तु धूली पार्श्वे निखन्य तु ६ प्रपूजयेत्प्रयत्नेन चतुर्दश्यां महानिशि ७ तत्करणमात्रेण स वश्यो जायते ध्रुवम् ८ अजारक्तेन संमि
श्रं मेनकापूपं तथैव च बलिदानं प्रदातव्यं दिव्यानुप्रीतये सदा ८ ॐ महाकालि स्वाहेति जुहुयाद्दष्टोत्तरशतं तद्दशांशं जपं चरेत् पुष्पैः सुपूजितम् ९
यंत्रं कालानलं नाम त्रिदशैरपि पूजितम् १० इति श्रीवशीकरणाधिकारे क्रूरवशीकरणं कालानलं नाम पंचदशं यंत्रम् श्रीशिव उवाच वाणिज्यस्य

रामः
१

© Dharmartha Trust J&K. Digitized by eGangotri

इकारस्थमध्यकीकारस्य विसर्गांतश्चतुर्दिशं एवैकाग्रे लिखित्वानु वन्हुलं वेष्टयेत्ततः ५६


बलिदानं प्रदापयेत् ८ मेल ५ ६



तुलाभार्यगतस्तन्न हि दृश्यते तेषां मध्ये यदा कोपि दुष्टभावं करोति च १ मार्गदेशे प्रभुर्वा पितदा यंत्रं प्रकल्पयेत् ह्रींकारोदरमध्ये तु साध्यनामलिखेन्नरः २ उपरिष्टाच्चतुर्दिक्षु स्वाहांतं प्रणवादिकं मध्ये स्याकर्षय लिखेच्चतुर्दिक्षु क्रमेण तु ३ पश्चात्तद्बहिर्यंत्रं चतुष्कोणं हि रेखया कोणे कोणे त्रिशूलं वै चतुर्दिक्षु प्रकल्पयेत् ४ एवं यंत्रवरं कृत्वा पूजयित्वा प्रयत्नतः स्वरक्तेन कुसुमिश्रं रोचनाभूर्जपत्रके ५ विलिख्य वेष्टुवतं तु कृत्वा तत्र हि सिदिपेत् तत्क्षणाज्जायते वश्यो महाक्रूरोपि मानवः ६ इति श्रीवशीकरणाधिकारे दुष्टवशीकरणं द्विपृष्ठिशालिका नाम षोडशं यंत्रम् श्रीशिव उवाच यदा महाबलः शत्रुर्वार्तां कर्तुं दिवांछति तदा तत्सानुकूलार्थं यंत्रं कुर्वीत कंटकम् १ साध्यनामलिखेन्मध्ये वन्हुलं वेष्टयेत्ततः श्मशानभस्मना लिख्य चार्कपत्रद्वयोपरि २ संपुटं कारयित्वा तु वेष्टयेत्कृष्णसूत्रतः निखन्य पूरयेद्यंत्रं श्मशाने निशि शक्तिमान् ३ बलिप्रदानं कर्तव्यं भूतेभ्यः प्रयतो नरः तत्क्षणाज्जायते शत्रुः सानुकूलो न संशयः ४ कंटकाख्यं महायंत्रं दुष्टमोहनकं परं स्वशान्त्या क्षिणं दद्यात्कालरात्रिः प्रीयतामिति ५ इति श्रीवशीकरणाधिकारे शत्रुसानुकूलकरणं नाम सप्तदशं यंत्रम् अथ सामान्यमगात् श्रीशिव उवाच सुहृद्वा शत्रुवर्गो वा बंधुर्वा क्रुध्यते यदि तदा तत्कोपशांत्यर्थं कुर्याद्यंत्रं विचक्षणः १ मध्ये नाम लिखित्वा तु वन्हुलं वेष्टयेत्ततः उपर्यधश्च तत्रैव दक्षिणे च तथैव च २ बिंदुवर्ज्यं चतुर्दिक्षु वेष्टयित्वा लिखेन्नरः हूंकारं तु लिखेत्क्रमेण बिंदुमध्ये उपर्यधः ३ दक्षिणे चोत्तरे चैव साध्यनाम च पूर्ववत् संप्रेते हूंकारसंयुक्तं मधःपं क्रोधप्रसादय ४ एतद्यंत्रं तु संलिख्य तालपत्रे सुविस्तृते कंटकेनोपसीवेत विलिखेत्सामवासरे ५ कुलालमृत्तिकामध्ये यंत्रं दत्वा तु गोलकं कृत्वा पूजां प्रयत्नेन यस्मात्कोपं प्रशाम्यति ६ जामदग्न्य महामंत्रं सद्यः कोपहरं परं भृगुः क्रोधनः सत्यवादी जमदग्निर्द्विजः सुतः रामस्य जनकः साक्षात्सत्यमूर्ते नमोस्तु ते ७ एतन्मंत्रं समुच्चार्य पूजां तेन नित्यमेव हि ८ एवं सप्तदिनं कार्यं क्रोधस्य हरणं परम् भोजनीयास्तन्नमे हि ब्राह्मणो वेदपारगः ९ नो चेद्दत्तं प्रदातव्यं मामप्याहारमूर्तये क्रोधस्तु हृदयाद्याति प्रसन्नो जायते क्षणात् १० इति श्रीवशीकरणाधिकारे क्रोधशमनं नाम जामदग्न्यमष्टादशं यंत्रम् श्रीशिव उवाच अतः परं देवि वक्ष्ये मिलानि दौर्भाग्यहंतॄणि च कामिनीनां यंत्राणि सौभाग्यविवर्द्धनानि संमोहनानि प्रियकामुकानाम् १ एकपंक्तौ समालिख्य ह्रींकारत्रितयं शुभे तस्याधस्तात्समालिख्य नाम वैरमणस्य च २ ततः पंक्तौ द्वितीयायां ह्रींकारत्रितयं पुनः तत्तत्तद्वेष्टयेत्सम्यक् चतुष्कोणं च रेखया ३ ततस्त्वष्टदलं कृत्वा बीजन्यासं प्रकल्पयेत् कोणेऽष्टदलेन्यस्य ह्रींकारं च विचक्षणः ४ रोचनाकुंकुमेनैव मृगनाभिसुचंदनम् एकीकृत्य लिखेद्यंत्रं भूर्जपत्रे सुविस्तृते ५ ज्ञयोदश्यां सितेपक्षे साधकः स्नानतत्परः तद्यंत्रं पूजयेन्नित्यं रात्रौ रात्रौ वरानने ६ भोगैर्नानाविधैः पुष्पैर्वस्त्रालंकारभूषणैः ७ एवं सप्तदिने कृत्वा तदंते तन्वचतुष्टये ७ स्त्रियः सौभाग्यसंयुक्ता भोजयेत्सुप्रसंख्यया शंकरस्य प्रिये देवि ललिते प्रीयतामिति ८ रूपं देहि यशो देहि सौभाग्यं देहि मे शिवे प्रियं देहि भगवति वांछितं प्रियमायुषम् ९ एतन्मंत्रं समुच्चार्य ततस्तान्निवेदयेत् तद्यंत्रं धातुनावेष्ट्य स्वकंठे धारयेत्ततः १



शि ५






को ५

© Dharmartha Trust J&K. Digitized by eGangotri


यं॰ त्रि॰ म॰ ४



२



३



४




सुभगा रूपसंपन्ना स्यातिप्रियतरा भवेत् ललिताख्यं महायंत्रं स्त्रीणां सौभाग्यकारकम् ११ इति वश्याधिकारे स्त्रीणां सौभाग्यकारकं ललि
ताद्देवताकं नामैकोनविंशं यंत्रम् श्रीशिव उवाच शृणु देवि प्रवक्ष्यामि यंत्रमत्यंतप्रसादनम् संलिख्य प्रियनाम्ना षोडशाकार पुटितं शुभे १
उपर्यधस्तथा लेख्यं षोडशाकाररंजितं शुभे ततस्तद्वेष्टयेत् सम्यग्वह्निमंडलरेखया वै कया २ तस्योपरि दलान्यष्टौ ह्रींकारसहितं लिखेत् रोचनाकुंकु
मेनैव भूर्जपत्रे लिखेन्नरः ३ त्रिदिनं पूजयेन्नित्यं रात्रौ तु प्रवरं प्रिये ततोनन्तं चतुर्थे हि पूजयेत्सुभगा त्रयं ४ अनेन गवलं मे देवि त्वं मे प्रीयतामिति
पत्नीप्रियं महाविष्णुं ऊह त्वं स्मरवल्लभं ५ एतन्मंत्रं समुच्चार्य पूजयित्वा तु ताः स्त्रियः तद्यंत्रं धातु संपुटितं कृत्वा कंठे तु धारयेत् ६ पतिदासी भवे
त्सा यंत्रराजप्रसादतः सौभाग्यमतुलं तस्या जायते नात्र संशयः ७ यास्तास्तासां नदूतं यंत्रं सौभाग्यवर्द्धनम् ८ इति श्रीवशीकरणाधि
काराधिकारे सौभाग्यकरं नाम विंशतिकं यंत्रं समाप्तिमगात् श्रीमहादेव उवाच योषिद्वश्यं प्रवक्ष्यामि शृणु देवि सुशोभने रोचनाकुंकुमेनै
व श्रीखंडमृगनाभिना १ भूर्जपत्रे च संलेख्य जातीकाष्ठेन यंत्रकम् ऐं ह्रीं क्लीं च ततो नाम ऐं ह्रीं क्लीं च ततः पुनः २ एवं संपुटितं कृत्वा चतुष्कोणं
तु वेष्टयेत् उपर्यधो लिखेत्सम्यग् बीजानि यत्नतः सुधीः ३ ऐं ह्रीं क्लीं च ततः कोणे तदंते पुनस्तथा कोणे विन्यस्य बीजानि ऐं ह्रीं क्लीं च ततः चतुर्
दलाकृतिश्चकर्तव्या बीजान्यनु प्रदक्षिणात् एवं चतुर्दलं कृत्वा बीजयुक्तं मनोहरम् ५ राजिकाप्रतिमां कुर्यान्मदनस्य च काष्ठके हृदि तस्य तु
संपूज्य यंत्रं च स्थापयेत्ततः ६ भोगैश्च विविधैर्गंधैर्धूपदीपैः फलैः शुभैः रात्रौ रात्रौ दिनांते च प्रत्यहं पूजयेत्क्रमात् ७ एवं कृते तु सा नारी दासीव
त्प्रजायते यंत्रश्रीकामराजाख्ये योषिद्वश्यकरं परम् ८ संपूज्या मदनस्यात्र राजिकाप्रतिमा नरैः कामोऽनंगः पंचशरः कंदर्पो मीनकेतनः ९
श्रीविष्णुतनयो देवः प्रसन्नो भव मे प्रभो इति पूजनमंत्रः स्यात् द्रष्टव्यकमललोचने १० एवं नित्यं च कर्तव्यं यावत्सा वश्यतामियात् संदेहो नात्र कर्त
व्य इति प्राह जनार्दनः ११ इति श्रीवशीकरणाधिकारे स्त्रीवशीकरणं नाम कामराजाख्यमेकविंशं यंत्रं श्रीशिव उवाच शृणु देवि प्रवक्ष्या
मि मानिनीमानमर्दनम् यंत्रं सुदुर्लभं लोके ख्यातं मदनमर्दनम् १ मृगमदस्य च रसेन रोचना भूर्जपत्रके षट्कोणं च तथा ह्रीं च साध्यनामोदरे प्रथक्कुर
नामाक्षराणि सर्वाणि ह्रींकारपुटितानि च स्थापयेत्प्रणवं लेख्यं मकरं कोणेषु बुद्धितः ३ ततस्तद्वेष्टयेत्सम्यक् चतुष्कोणं तु रेखया ४ उपर्यधश्च संलेख्य पूर्ववद्
बीजसंपुटम् ४ कोणे दलाकृतिं कुर्यान्मदेलाकृतिमध्यतः एतद्यंत्रं तु संलिख्य मदनप्रतिमां शुभाम् ५ मदनस्य तु काष्ठेन कृत्वा हृदि विनिःक्षिपेत्
सर्वं गृहदयं कुर्याद्यस्या यंत्रं तु तिष्ठति ६ संवेष्ट्य प्रतिपन्नं यंत्रं तस्यां संपुटम् रक्तचंदनमालेप्य पूजयेत्प्रत्यहं च तत् ७ इति श्रीवशीकर
णाधिकारे स्त्रीवशीकरणं नाम मदनमर्दनं द्वाविंशं यंत्रम् श्रीमहादेव उवाच अतः परं प्रवक्ष्यामि राजस्त्रीवश्यकारकम् यथा तु दृष्टिपातेन का
मबाणहता इव १ एतत् तिसहस्रा दृष्टमानि त्यामदविह्वला रोचनाकुंकुमेनैव भूर्जपत्रे लिखेन्नरः २ कर्पूरेण समं यंत्रं जातीकाष्ठविधान
तः षट्कोणस्य च मध्ये तु तस्या नाम प्रतिष्ठितम् ३ ओंकारः सर्वतो लेख्यः कोणे परितः सर्वतः पूर्वे कोणांतराले तु ह्रींकारं पूर्वसंस्थितम् ४ तत्स
र्वं वेष्टयेत्सम्यक् वह्निमंडलरेखया सुभग दलानि विद्दलं कुर्याच्छ्री प्रत्येकदलेन तथा ५ ह्रींकारं दलमध्ये तु क्रमेण प्रतिलेखयेत् एवं संलिख्य त
द्यंत्रं पूजयेद्भक्तिभावतः ६ गंधैः पुष्पैः सनैवेद्यैः शुक्लांबरधरः स्वयम् चिंतयेत्तां स्त्रियं रात्रौ यंत्रस्य पुरतः स्थितः ७ एवं सप्तदिनं कृत्वा तदंते।
ब्राह्मणास्त्रयः संभोज्या विविधैर्भोज्यैः कामाख्यः प्रीयतामिति ८ शक्त्या च दक्षिणां दद्यात्संभोजयेत्साधकः स्त्रियम् त्रिलोह वेष्टितं कृत्वा
बाहुमूले च धारयेत् ९ तं दृष्ट्वा राजपत्नी कंदर्पशरपीडिता स्वयं प्रार्थयेन्नित्यं का कथा तरयोषितां १० इति श्रीवशीकरणाधिकारे तृतीय
यष्टिकायो राजांगनावश्यकरं कामाख्यं त्रयोविंशं यंत्रं श्रीमहादेव उवाच अतः परं प्रवक्ष्यामि बीजमेकं महाफलम् तद्योधारयेतन्नित्यं
स्त्रीणां प्रियतरो भवेत् १ स्त्री चेद्धारयेत भक्त्या सा सौभाग्यवती भवेत् सौभाग्यजननं बीजं नृणां चैव विशेषतः २ तद्बीजादलं गोपनं देयं यस्य कस्य चित्
उड्डीशे स्त्रीवशीकरणं श्वेतगुंजापुष्पं नक्षत्रे संगृह्य गोरोचनया कुंकुमेन सह आदित्यवारे तिलकं कारयेत् तदा कामबाणमोहिता विह्वला भवति
तिलकमनेन मंत्रेण कुर्यात् ॐ ऐं ह्रां ह्रीं हुं फट् स्वाहा इति कामबाणतिलकम् = २१

मं॰चिं॰ ४ रामः ४

© Dharmartha Trust J&K. Digitized by eGangotri

सकारंच हकारंच वकारंच तथैव च लकारंच उकारंच ईकारांतप्रतिष्ठितम् एवं क्रमेण संयोज्य षट्कमक्षरसंगतम् ४ ईकारस्वरसंयुक्तं बिंदुनोपरिशो-
भितम् रोचनानीरयुक्तेन भूर्जपत्रे लिखेन्नरः ५ त्रिदिनं पूजनं कृत्वा ततः संवेष्ट्य हाटके पुरुषो बाहुमूले च नारी हृदि तथैव च ६ धारयेद्बीजमाजं तु सुतंदोभी
ग्यनाशनं महासौभाग्यजननं श्रीशिवेन प्रतिष्ठितम् ७ इति श्रीवशीकरणाधिकारे तृतीयपीठिकायां सौभाग्यजननं नाम चतुर्विंशयंत्रम् २४ श्रीमहादेव उवाच अथातः
संप्रवक्ष्यामि यंत्रं सौभाग्यदायकं स्त्रीणामेव समुद्दिष्टं यंत्रकं मलसंस्तकम् १ अस्यैव धारणाद्देवि वंध्या गर्भवती भवेत् मृतवत्सा तु या नारी तस्यास्तु यंत्रमुत्तमम् २ धार-

णाज्जायते देवि जीववत्सा न संशयः रोचनाकुंकुमेनैव भूर्जपत्रे लिखेन्नरः ३ षट्कोणं तु लिखेत्पूर्वं ह्रींकारं तदनंतरम् तेनैव मण्डनामापि ह्रींकारांतं प्रतिष्ठितम् ४ ऊर्ध्व-
योर्योपि विलिखेदेकं क्रोंकारमेव च ततस्तद्वेष्टयेत्सर्वं वर्तुलं रेखया पुनः ५ तस्योपरि दलान्यष्टौ बीजाक्षरयुतानि च हंकारं चतुर्दिक्षु दलमध्ये तु विन्यसेत् ६ ॐ
क्रोंच तथा ह्रीं च उंकारं च तथैव च ह्रींकारं च पुनर्लेख्यमेवं बीजचतुष्टयम् ७ कोणे कोणे दले लेख्यं मध्यदेशे तु साधकः एवं यंत्रं सुसंलेख्य पूजयेत्तु दिनत्रयम् ८
भोजयेन्मिथुनं चैकं लोकेशः प्रीयतामिति पश्चात्तु तं तु नावेष्ट्य सुवर्णेन विशेषतः ९ वर्तुलं मणिवत्कृत्वा हारमध्ये तु धारयेत् धारणाज्जायते देवि सौभाग्य-
मतुलं महत् १० जीववत्सा भवेन्नूनं वंध्या चैव प्रसूयति कमलाख्यं महायंत्रं रहस्यं तु ब्रह्मणा पुरा ११ न देयं यस्य कस्यापि साधकेन वरानने इति श्रीयंत्रचिंता-
मणौ महाकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे वशीकरणाधिकारे नामोदरपिंडितोद्धृते तृतीयपीठिकायां कमलाख्यं पंचविंशतितमं यंत्रम् श्रीशिव उवाच
इति वशीकरणाधिकारः समाप्तः अथाकर्षणाधिकारः जयति जगदशेषं द्योतयन्दिव्यभामा मान्विशदकिरणकांतिः प्रस्फुरच्चंद्रमौलिः विषविषमम-


हाहिप्रोल्लसच्चारुहासः सततममिततेजा नाममूर्तिर्महेशः १ चिंतामणौ कल्पवरे चतुर्थे प्रारभ्यते संप्रति पीठिकेयम् आकर्षियंत्राणि पदे स्फुटा-
नि विचारयामीति तु पीठिकायाम् २ संलिख्य नाम भूर्जपत्रमध्ये गोरोचनाकर्षितेन चतुरस्रेण सकारबीजान्सविसर्गयुक्तान्स्वोपरिष्टात्
लिखेच्च यंत्रम् ३ ईकारमध्ये विनिवेश्य यस्मात् विसर्गयुक्तौ तु लिखेत्सकारौ क्रोंह्रींतया क्रोंच विलिख्य पंक्तौ वर्णस्य पंक्तिं महता क्रमेण ४ एवं द्विपंक्तौ
च विलिख्य पश्चात् नाम तु मध्ये विलिखेच्च पंक्तिम् ह्रींक्रोंतथा ह्रीं च तथैव क्रोंच विलिख्य नाम स्तु हधोविभागे ५ ह्रीं क्रोंतथा ह्रीं च विलिख्य पंक्तौ तस्या-
प्ययो वै विलिखेत्तु बीजको दकार रेफौ तु विलिख्य पश्चात्संवेष्टयेत्त्रिः परिवेष्टनेन ६ संपूज्य यंत्रं विधिवच्च पश्चात्सूत्रेण संवेष्ट्य सुपांडुरेण ७ हुते नैव स्व-


शरीरजेन विधाय मूर्तिं मनुजस्य नूनम् ८ विधाय तस्या हृदि यंत्रराजं विधाय चाहुत्येन पश्चात् संतापयेत्तां खदिरस्य वह्निना दिनत्रयं मंत्रवरैः त्रिसंध्यं ९
सुप्रतापमंत्रः देवदत्तं वेगेनाकर्षय मणिभद्र स्वाहा एवं कृते कर्षति माणिभद्रो देशांतरस्थमनुजं च नूनम् अत्यंतदूरस्थमपि क्रमेण समानयेद्यंत्र-
वरो हि नूनम् १० पूर्वं प्रपूजितः सम्यक्शोधनानयाकर्षति माणिभद्रः इति श्री आकर्षणाधिकारे चतुर्थपीठिकायां माणिभद्राख्यं आकर्षणं नाम प्रथमं यंत्रम्
श्रीमहादेव उवाच अतः परं प्रवक्ष्यामि यंत्रं मित्रस्य दर्शनं रक्तचंदनेनानामिकारक्तेन मिश्रेण वै भूर्जपत्रके १ मध्ये नाम लिखित्वा तु वर्तुलं वेष्टयेत्ततः चतुर्दले न-
तः कुर्याद्बीजयुक्तं मनोहरं २ हूंकारं दलमध्ये तु प्रत्येकं विलिखेत्क्रमात् एवं यंत्रं तु संपूज्य बलिपुष्पैर्मनोहरैः ३ प्रदीपे द्रुतमध्ये तु स्थाप्याक्षिप्त्रिदिनाष्टकं एतद्यं-

त्रं महागोप्यं रक्षणीयं प्रयत्नतः न देयं यस्य कस्यापि यदीच्छेत्सिद्धिमात्मनः ४ इति श्री आकर्षणाधिकारे चतुर्थपीठिकायां मित्रदर्शनं नाम द्वितीयं
यंत्रम् श्रीमहादेव उवाच अथातः संप्रवक्ष्यामि यंत्रं त्रैपुरकं महत् रोचनानीरयुक्तेन भूर्जपत्रे लिखेन्नरः १ मध्ये नाम लिखित्वा तु ह्रींकारपुटितं शुभं
षट्कोणं तु लिखेत्पश्चान्नामगर्भं मनोहरम् २ सौंकारान्विलिखेत्कोणे मध्यतो बिंदुभूषितम् एतद्यंत्रं तु संपूज्य तन्मध्ये विनिःक्षिपेत् ३ प्रत्यहं पूज-
येन्नित्यं प्रार्थयेत्त्रिपुरां पुनः आकर्षय महावेगाद्देवदत्तं मम प्रियम् ४ त्रिपुरे देवेशि तुभ्यं दास्यामि याचितम् प्रार्थयन्मंत्रेणानेन त्रिपुरायै प्रपूजयेत् ५

© Dharmartha Trust J&K. Digitized by eGangotri

5

यं चि म ५



एवं कृते सप्तमे ह्नि साक्षात्पि जीयते ध्रुवम् ६ इति श्री आकर्षणाधिकारे त्रैपुरं नामाकर्षणयंत्रं तृतीयं श्रीमहादेव उवाच।
अथातः संप्रवक्ष्यामि कामिन्याकर्षणं शुभम् रहस्यं सर्वयंत्राणां तत्क्षणात्सिद्धिदायकम् १ न देयं यस्य कस्यापि यंत्रराजं सुदु
ष्करम् स्वनामिकायां तेनैव मे करतले लिखेत् २ प्रणवं च तथा ह्रीं ह्रीं ह्यक्षरं क्रों लिखेन्नरः लिखाहा त्रितयं चैव तस्याधो विलि
खेत्तमाम् ३ तस्याप्यधो लिखेन्नाम रमण्याश्चैव सुव्रते त्रिकोणं वेष्टयेत्पश्चाद्बीजानामुपरि प्रिये ४ एवं कृत्वा तु संपूज्य तत्रैव ऊर्ध्वे शुभे
यो ममाग्रे पुनर्नारी समायाति न संशयः ५ यंत्रं श्रीकामराजाख्यं देवानामपि दुर्लभम् ६ इति श्री ललनाकर्षिकामराजाख्यं चतुर्थयंत्रम्
श्रीमहादेव उवाच अथातः संप्रवक्ष्यामि यंत्रं वै देवमात्रिकम् कर्षणं नरनारीणां शृणु देवि महत्फलम् १ तालार सहरिद्राच मजिष्ठ
भूर्जपत्रके लेखनीयं प्रयत्नेन काकिनायं त्रसुतममम् (?) २ मध्ये नाम लिखित्वा तु त्रिकोणं वेष्टयेत्ततः तत्रापि वेष्टयेत्पश्चाद्भानुतुल्यं यत्नतः प्रिये ३
तस्योपरि स्वरा लेख्या अकाराद्यास्तु षोडश ततस्तद्वेष्टयेत्सर्वं रेखया नेत्रसंख्यया ४ तस्यैव पादधस्त्रायफ्रऊयं क्षालभञ्जिकाम् (?) तस्या
योनौ तु संलिखेद्यंत्रराजं प्रपूजितम् ५ एवं कृते तु साक्षात्सा समायाति न संशयः वज्रनात्रविभिन्नेन पत्नीवस्त्रहृच्चानयेत् ६ यंत्रराजो महागोप्यो
देवमात्रिकसंज्ञिकः [illegible]
[illegible] २ इति श्री आकर्षणाधिकारे मानिनी आकर्षणं देवमात्रिकसंज्ञं पंचमं यंत्रं समाप्तम् आकर्षणाधिकारः चिंतामणौ कल्पवरहृदये
त्रे श्रीचंडरुद्र उमयामुखाद्विनिर्गते तस्मिन्स्तु तुर्यो विलिपीठिकाभिमं चकार दामोदरविप्रवर्यः १ आकर्षणं नाम महाधिकारं २ एति
तीयं हि महाप्रभावम् पंचैव यंत्राणि महाप्रभाव रहस्यभूतानि लकीर्तितानि २ नारायणीमिति गदंति सर्वे लोकायां विश्वमातरमि
ति भुवंतिके चित् गंधर्वसिद्धसुरयक्षगणेस्तुतां तां विश्वेश्वरीं मम यदा त्रिगुणां नमामि ३ स्तंभनं नाम महाधिकारं विचार
यामो त्रतु पीठिकायाम् यंत्राणि बीजानि च शृणु देवि संस्तंभनानि लक्षणसिद्धिदानि ४ श्रीशिव उवाच शृणु देवि महायंत्रं स्तंभ
नं सर्ववैरिणाम् विवादे व्यवहाराणां सुवेस्तंभो भवेद्ध्रुवम् १ यदा कालवशाद्देवि कलहः संप्रजायते तदा ऊर्ध्वं महायंत्रं जिह्वावे
धनकं परम् २ रोचनाभूर्जपत्रे संलेख्य सुविचक्षणैः षट्कोणाष्टकं प्रकुर्वीत रेखाद्वितयकेन तु कोष्ठमध्ये लिखेद्बीजं पत्येके मे
कमेककम् हकारं च मकारं च लकारं तदनंतरम् ४ वकारं चक्रकारं च यकारां तप्रतिष्ठितम् ऊकारस्वरसंयुक्तं मस्तके रेफभूषितम् ५
बिंदुमात्रार्द्धसंयुक्तं कोष्ठके वर्णषट्ककम् स्वरद्वितयसंयुक्तं बिंदुनोपरिभूषितम् ६ एवं संजायते बीजं सुस्तंभनमनुत्तमम्
कोष्ठकोष्ठे तु संलेख्यमेकैकं बीजमुत्तमम् ७ एवं बीजानि लेख्यानि रेखाद्वितयकेन तु बीजोपरिगताः कृत्वा कोणा दशाष्ट तु दिशम् ८
बाह्ये रेखाद्वयोर्लेख्यास्त्रिशूलामस्तकोपरि सर्वत्र रेखयाचांते त्रिशूलानि लिखेत्क्रमात् ९ ठकारबीजानि षड् देवचो ध्वमपापि (?)
तावंति लिखेच्चतुर्ष्टानम् (?) दिग्दक्षिणस्यां च तथा त्रिबीजं यावंति संख्यानि तथैव चोत्तरे १० श्री हस्ये संज्ञानि विलिख्य पश्चात्संपू
ज्य यंत्रं विधिवत्प्रयत्नात् जपेच्च मंत्रं मनसा सुनिश्चलस्तथा त्रिसंध्यं त्रिदिनं प्रयत्नतः ११ अथ मंत्रः ह्ल्र्लूं ल स्तंभय स्तंभय
अमुकस्य मुखं स्तंभय स्तंभय स्वाहा अष्टोत्तरशतं जपनीयम् संपूजयेद्यंत्रवरं त्रिसंध्यं पीतैः सुपुष्पैः कनकावदातैः एवं कृते शत्रुग
तिं मतिं च संस्तंभयेद्यंत्रवरो हि नूनम् १२ मूढो महामूकश्च जायते मनोमहोरणविरुद्धमेह्लागनः (?) १३ इति स्तंभने शत्रुमुखस्तंभनं
प्रथमं यंत्रम्


रामः ५

© Dharmartha Trust J&K. Digitized by eGangotri


कर्णिकारं कुरंटं च चंपकं स्वर्णकेतकी धत्तूरं पीतवर्णं च नागकेसरमेव च गाह्याण्येतानि पुष्पाणि यथालाभं वरानने अन्यानि पीतवर्णानि निगाह्याणि के दोचन = ४

मध्ये ४२

